Sl.No. :

नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – 20

No. of Printed Pages – 11

SS–12–Sanskrit Sah. (Supp.)

यहाँ से काटिए

# उच्च माध्यमिक पूरक परीक्षा, 2024

## SENIOR SECONDARY SUPPLEMENTARY EXAMINATION, 2024

## संस्कृतसाहित्यम्

समय : 3:15 (सपाद त्रिवादनम्)

पूर्णाङ्कः : 80

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

**परीक्षार्थिभ्यः सामान्य निर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांकः अनिवार्यतः लेख्यः ।

2) सर्वे प्रश्नाः अनिवार्याः ।

3) प्रत्येकं प्रश्नस्योत्तरं उत्तरपुस्तिकायामेव देयम् ।

4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

यहाँ से काटिए

## खण्डः – 'अ'

1) वस्तुनिष्ठ प्रश्नाः –

i) विद्यया किं प्राप्नोति? [1]

अ) अविद्याम्

ब) विषम्

स) अमृतम्

द) मृत्युम्

ii) कौत्सः कस्य शिष्यः असीत्? [1]

अ) रघोः

ब) वरतन्तोः

स) वाल्मीकेः

द) शुकदेवस्य

iii) अकर्मणः किं ज्यायः? [1]

अ) कर्म

ब) अकर्म

स) योगः

द) श्रेष्ठः

iv) पापात् कः निवारयति? [1]

अ) बन्धुः

ब) शत्रुः

स) मरालः

द) सन्मित्रम्

v) शिववीरस्य विश्वासपात्रं किम् आदाय तोरणदुर्गं प्रयाति? [1]

अ) संवादम्

ब) पत्रम्

स) पुष्पगुच्छम्

द) अश्वम्

vi) 'यतिः' इत्यस्य नामान्तरं अस्ति – [1]

अ) गुरुः

ब) गणः

स) मात्रा

द) विरामः

vii) भेदे साधर्म्यं कस्मिन् अलङ्कारे भवति? [1]

अ) यमकालंकारे

ब) अनुप्रासालंकारे

स) उत्प्रेक्षालंकारे

द) उपमालंकारे

viii) 'अर्ध + यत्' इत्यत्र किं पदं भवति? [1]

अ) अर्धवान्

ब) अर्धी

स) अर्ध्यम्

द) अर्धता

ix) 'अन्यथेतः' इत्यत्र कः सन्धिः? किं च सूत्रम्? [1]

अ) यण् (इको यणचि)

ब) अयादिः (एचोऽयवायावः)

स) दीर्घः (अकः सवर्णे दीर्घः)

द) गुणः (आद्गुणः)

**2)** रिक्तस्थानानि पूरयत –

उचित – उपपदविभक्तिं लिखत –

i) ................ विना जीवनं नास्ति। (जल) **[1]**

ii) ............... स्वस्ति। (प्रजा) **[1]**

iii) ................ धिक्। (दुर्जन) **[1]**

iv) ................ पुरतः पिप्पलवृक्षः अस्ति। (विद्यालय) **[1]**

प्रकृति प्रत्ययौ योजयित्वा पदं लिखत –

v) वचसा सततं ............... । (वद् + अनीयर्) **[1]**

vi) शैलजा .............. शिवालयं गच्छति। (अर्च् + तुमुन्) **[1]**

vii) ............... पिपीलको याति। (गम् + शतृ) **[1]**

**3)** क) अतिलघूत्तरात्मक प्रश्नाः –

i) वेदाङ्गानि कति भवन्ति? **[1]**

ii) 'मुद्राराक्षसम्' इति नाटकं केन विरचितम्? **[1]**

iii) बाणभट्टविरचितः प्रसिद्धः कथाग्रन्थः कः? **[1]**

iv) कालिदासेन कानि नाटकानि रचितानि? **[1]**

v) करुणरसस्य अभिव्यक्तये सविशेषं कः प्रशस्यते? **[1]**

vi) 'ईश्वरविलासः' इति महाकाव्यस्य लेखकः कः? **[1]**

vii) पण्डितनवलकिशोरशास्त्रिणः जन्म कुत्र अभवत्? **[1]**

viii) 'दायरे' इति सीरियलमाध्यमेन कः साहित्यकारः प्रसिद्धः? **[1]**

ix) 'बालशाकुन्तलम्' इति नाटकं केन लिखितम्? **[1]**

x) 'आदर्शदम्पती' इति उपन्यासस्य रचनाकारः कः? **[1]**

ख) अधोलिखितपदानां सूत्रोल्लेखपूर्वकं सन्धिविच्छेदं कुरूत – **[1+1+1=3]**

i) अनेजदेकम्

ii) नार्दति

iii) सिद्धावसिद्धौ

## खण्डः – 'ब'

4) अधोलिखितयोः छन्दसोः एकस्य लक्षणम् उदाहरणं च लिखत – [2]

क) मन्दाक्रान्ता

ख) उपजातिः

5) अधोलिखित – श्लोकांशस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरूत – [2]

''हंसो यथा राजतपञ्जरस्थः''।

6) अधोलिखितयोः अलङ्कारयोः कस्यचिदेकस्य लक्षणम् उदाहरणं च लिखत – [2]

क) उपमा

ख) रूपकम्

7) अधोलिखित–श्लोकांशस्य अलंकारस्य लक्षणं लिखत – [2]

''उच्छलद् भूरि कीलालः शुशुभे वाहिनीपतिः'' ।

8) अधोलिखित श्लोकस्य अन्वयं लिखत – [2]

अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम् ।
रमते न मरालस्य मानसं मानसं विना ।।

9) अधोलिखित शब्दानाम् अर्थं लिखत – [2]

क) अजस्रम्

ख) ज्यायः

ग) मरालः

घ) सादी

**10)** हिन्दीभाषायां सप्रसंगभावार्थं लिखत। **[2]**

''विभूषणं मौनमपण्डितानाम्''।

अधोलिखितम् अपठित गद्यांशं पठित्वा 11-14 प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत।

स्त्रियो हि मातृशक्तेः प्रतीकभूताः भवन्ति। शिशौ संस्कारा धानस्य, सदाचारशिक्षणस्य, भर्तुः सहयोगस्य, परिजनानां सेवायाः, अतिथीनां शुश्रूषायाः लोकहितसम्पादनस्य च समग्रमपि कर्त्तव्यजातं स्त्रीषु निपतति। अतः स्त्रीणां कृते शिक्षायाः परमा आवश्यकता वर्तते। सुगृहिणी तदैव सा सम्भवति यदा सुशिक्षिता स्यात्, सुशिक्षयैव परिवारस्य समाजस्य राष्ट्रस्य च हितं सम्पादयितुं सा समर्था भवति। गृहस्य सुशिक्षिता स्त्री सद्गृहिणी, गृहस्वामिनी गृहलक्ष्मीः वा भवति। सैव मातृभूता सद्वंशं सन्नागरिकं च निर्मातुं प्रभवति। स्त्री एव समाजे धार्मिकसंस्काराणां सद्गुणादिकानां स्थापनां करोति। अतः समाजे राष्ट्रे वा स्त्रीणां समादरो मातृशक्तेश्च गौरवरक्षणं तदैव सम्भवति यदा ताः सुशिक्षिताः स्युः। 'मातृदेवो भव' इति कथनमपि तदैव सुसङ्गतं भवति। मनुनाऽपि कथितम् – 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।'

**11)** एकपदेन उत्तरत – **[4×½=2]**

क) मातृशक्तेः प्रतीकभूताः काः भवन्ति?

ख) स्त्रीणां कृते कस्याः परमा आवश्यकता वर्तते?

ग) स्त्री धार्मिक संस्काराणां स्थापनां कुत्र करोति?

घ) 'यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः' इति केन कथितम्?

**12)** पूर्णवाक्येन उत्तरत – **[1+1+1=3]**

क) किं किं कर्त्तव्यजातं स्त्रीषु निपतति?

ख) स्त्री सुगृहिणी कदा सम्भवति?

ग) कासां कृते शिक्षायाः परमावश्यकता वर्तते?

**13)** भाषा – सम्बद्धकार्यम् – **[4×½=2]**

क) 'सुगृहिणी तदैव सम्भवति' इत्यत्र कर्तृपदं लिखत।

ख) 'सुशिक्षिता स्त्री' इत्यत्र विशेषणपदं लिखत।

ग) 'ताः सुशिक्षिताः स्युः' इत्यत्र 'ताः' इति सर्वनाम पद – स्थाने सञ्ज्ञापदं लिखत।

घ) 'कुशिक्षिता' इत्यस्य विलोमपदं लिखत।

**14)** अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। **[1]**

## खण्डः – 'स'

**15)** अधोलिखितं पठितगद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत । **[5]**

श्रीनायारः केन्द्रसर्वकारतः स्थानान्तरेण आगत्य ओडिशा – सर्वकारस्य अधीने प्रायः वर्षत्रयेभ्यः कार्यं करोति । तथाप्यस्मिन् वर्षत्रयात्मके कालखण्डे एकवारमपि स्वराज्यं केरलं प्रति गमनाय इच्छां न प्रकटितवान् । स स्वल्पभाषी, अतस्तस्य मनः कथा मनोव्यथा वा बोधगम्या नास्ति । सन्तुलितो वार्त्तालापः, साक्षात्समये आगमनम्, ततः सञ्चिकासु मनोनिवेशः, कार्यं समाप्य स्वगृहं प्रत्यागमनं च तस्य वैशिष्ट्यमासीत् । तस्य कर्मनैपुण्यं दृष्ट्वा एव ओडिशासर्वकारस्तं स्थानान्तरेण स्वीकृत्य खाद्य – आपूर्तिविभागे सचिवपदे नियुक्तवान् ।

i) यथानिर्देशम् उत्तरं लिखत – **[1+1+1=3]**

क) श्रीनायारः कुतः स्थानान्तरेण आगत्य ओडिशासर्वकारअधीने कार्यं करोति? (एकपदेन उत्तरत)

ख) कः स्वल्पभाषी? (एकपदेन उत्तरत)

ग) श्रीनायारः कस्मिन् विभागे सचिवपदे नियुक्तः? (पूर्णवाक्येन उत्तरत)

ii) भाषिककार्यम् – (प्रदत्तविकल्पेभ्यः उत्तरं चिनुत) **[1+1=2]**

क) ''तस्य मनोव्यथा बोधगम्या नास्ति'' इत्यत्र क्रियापदं किम्?

अ) तस्य  ब) मनोव्यथा

स) बोधगम्या  द) नास्ति

ख) 'तस्य' इति सर्वनामपदस्य सञ्ज्ञापदं किम्?

अ) श्रीनायारस्य  ब) केन्द्रसर्वकारस्य

स) मेर्याः  द) श्रीदासस्य

अथवा

तदतिकुटिलचेष्टादारुणे राज्यतन्त्रे, अस्मिन् महामोहकारिणि च यौवने कुमार ! तथा प्रयतेथाः यथा नोपहस्यसे जनैः, ननिन्द्यसे साधुभिः, न धिक्क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न वञ्च्यसे धूर्तैः, न विडम्ब्यसे लक्ष्म्या, नाक्षिप्यसे विषयैः नापह्रियसे सुखेन ।

i) यथानिर्देशम् उत्तरं लिखत – **[1+1+1=3]**

क) कैः न निन्द्यसे? (एकपदेन उत्तरत)

ख) कया न विडम्ब्यसे? (एकपदेन उत्तरत)

ग) राज्यतन्त्रं कीदृशम्? (पूर्णवाक्येन उत्तरत)

ii) भाषिककार्यम् – (प्रदत्तविकल्पेभ्यः उत्तरं चिनुत) **[1+1=2]**

क) 'अस्मिन् महामोह कारिणि च यौवने' इत्यत्र विशेष्यपदं किम्?

अ) अस्मिन् ब) यौवने

स) च द) महामोह कारिणि

ख) 'यथा विषयैः नाक्षिप्यसे' इत्यत्र क्रियापदं किम्?

अ) यथा ब) विषयैः

स) न द) आक्षिप्यसे

**16)** अधोलिखितं पद्यं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत। **[5]**

नालम्बते दैष्टिकतां न निषीदति पौरुषे।

शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते॥

i) यथानिर्देशम् उत्तरं लिखत – **[1+1+1=3]**

क) विद्वान् कां नालम्बते? (एकपदेन उत्तरत)

ख) पौरुषे कः न निषीदति? (एकपदेन उत्तरत)

ग) सत्कविरिव विद्वान् किं द्वयम् अपेक्षते? (पूर्णवाक्येन उत्तरत)

ii) भाषिककार्यम् (प्रदत्तविकल्पेभ्यः उत्तरं चिनुत) **[1+1=2]**

क) 'विद्वान् दैष्टिकतां न निषीदति' इत्यत्र क्रिया पदं किम्?

अ) दैष्टिकतां ब) न

स) निषीदति द) विद्वान्

ख) 'मूर्खः' इतिपदस्य विलोमपदं पद्यात् चित्वा लिखत।

अ) विद्वान् ब) पौरुषम्

स) शब्दार्थौ द) सत्कविः

अथवा

न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् ।

जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन् ।।

i) यथानिर्देशम् उत्तरं लिखत – [1+1+1=3]

क) विद्वान् अज्ञानां किं न जनयेत्? (एकपदेन उत्तरत)

ख) विद्वान् कीदृशानाम् अज्ञानां बुद्धिभेदं न जनयेत्? (एकपदेन उत्तरत)

ग) कर्मसङ्गिनाम् अज्ञानां बुद्धिभेदं कः न जनयेत्? (पूर्णवाक्येन उत्तरत)

ii) भाषिककार्यम् (प्रदत्तविकल्पेभ्यः उत्तरं चिनुत) [1+1=2]

क) 'न बुद्धिभेदं जनयेत् अज्ञानां कर्मसङ्गिनाम्' इत्यत्र विशेषणपदं किम्?

अ) बुद्धिभेदं   ब) जनयेत्

स) अज्ञानां   द) कर्मसङ्गिनाम्

ख) 'जोषयेत्' इतिपदस्य कर्तृपदं पद्यात् चित्वा लिखत ।

अ) अज्ञः   ब) बुद्धिभेदः

स) विद्वान्   द) समाचरन्

17) अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत । [5]

लवः – (सगर्वम्) । अहो ! संदीपनान्यक्षराणि ।

बटवः – किमुच्यते? प्राज्ञः खलु कुमारः ।

लवः – भो भोः ! तत्किमक्षत्रिया पृथिवी? यदेवम् उद्घोष्यते? (नेपथ्ये) रे रे महाराजं प्रति कः क्षत्रियः?

लवः – धिग् जाल्मान् ।

i) यथानिर्देशम् उत्तरं लिखत – [1+1+1=3]

क) संदीपनानि कानि? (एकपदेन उत्तरत)

ख) कान् धिक्? (एकपदेन उत्तरत)

ग) कुमारः कीदृशः अस्ति? (पूर्णवाक्येन उत्तरत)

ii) भाषिककार्यम् (प्रदत्तविकल्पेभ्यः उत्तरं चिनुत) [1+1=2]

क) '(सगर्वम्) । अहो ! संदीपनान्यक्षराणि' इत्यत्र विशेषणपदं किम्?

अ) सगर्वम्   ब) अहो !

स) अक्षराणि   द) संदीपनानि

ख) भो भोः ! तत्किमक्षत्रिया पृथिवी? इत्यत्र कर्तृपदं लिखत।

अ) भो भोः ! ब) पृथिवी

स) किम् द) तत्

अथवा

योगाचार्यः – प्रियच्छात्राः ध्यानेन श्रृणुत। योगश्चित्तवृत्तिनिरोधः।

मोहनः – चित्तवृत्तिनिरोधः अथ किं तात्पर्यम्?

योगाचार्यः – चित्तवृत्तीनां भेदं लक्षणम् चावगच्छन्तु प्रथमं, ततः विस्तरेण बोधयामि – प्रमाणविपर्यय – विकल्पनिद्रास्मृतयः इति।

प्रमाणम् – अर्थात् प्रत्यक्षानुमानागमाः प्रमाणानि।

विपर्ययः – अर्थात् विपर्ययो मिथ्याज्ञानमत द्रूप–प्रतिष्ठितम्।

विकल्पः – अर्थात् शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः।

निद्रा – अर्थात् अभावप्रत्ययालम्बनावृत्तिः निद्रा।

स्मृतिः – अनुभूतविषयासम्प्रमोषः स्मृतिः।

i) यथानिर्देशम् उत्तरं लिखत – **[1+1+1=3]**

क) कः योगः? (एकपदेन उत्तरत)

ख) कानि प्रमाणानि (एकपदेन उत्तरत)

ग) स्मृतिः का अस्ति? (पूर्णवाक्येन उत्तरत)

ii) भाषिककार्यम् (प्रदत्तविकल्पेभ्यः उत्तरं चिनुत) **[1+1=2]**

क) 'अर्थात् शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः' इत्यत्र विशेष्यपदं किम्

अ) अर्थात् ब) शब्दज्ञानानुपाती

स) वस्तुशून्यः द) विकल्पः

ख) 'मनोवृत्तीनाम्' इति पदस्य पर्यायपदं किम्?

अ) विकल्पः ब) चित्तवृत्तीनाम्

स) निद्राः द) योगानाम्

## <u>खण्डः – 'द'</u>

18) रेखांङ्कित पदेषु प्रश्ननिर्माणं कुरूत । (केषाञ्चित् चतुर्णाम्) [4×1=4]

क) जगत्सर्वम् <u>ईशावास्यम्</u> अस्ति ।

ख) कौत्सः <u>गुरुदक्षिणार्थं</u> रघुं प्राप ।

ग) आयुधीयश्रेणयः <u>कुमारं</u> तर्जयन्ति ।

घ) बुद्धियुक्तः अस्मिन् संसारे <u>सुकृतदुष्कृते</u> जहाति ।

ङ) <u>शुकनासः</u> चन्द्रापीडम् उपदिशति ।

च) प्रीतिलक्षणं <u>षड्विधं</u> भवति ।

19) अधोलिखित वाक्यानां संस्कृतभाषायाम् अनुवादः करणीयः । (केषाञ्चित् पञ्चानाम्) [5×1=5]

क) वह बालक को देखता है ।

ख) मैं विद्यालय जाता हूँ ।

ग) मित्र पाप से हटाता है ।

घ) मैं राजा के लिए चार रत्न दूँगा ।

ङ) शत्रु कान से बहरा है ।

च) बालिका कुत्ते से डरती है ।

छ) अध्यापक सुधाखण्ड से श्यामपट्ट पर लिखता है ।

ज) सरस्वती को नमस्कार ।

20) निम्नलिखितेषु कमपि विषयं स्वीकृत्य 50-60 शब्देषु संस्कृत भाषायां निबन्धं लिखत । [5]

क) संस्कृतभाषा

ख) मम विद्यालयः

ग) विद्याधनम्

❍❍❍❍

DO NOT WRITE ANYTHING HERE